

## ॥ पुरुषसूक्तम् ॥

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा । अत्यतिष्ठ-
द्दशाङ्गुलम् । पुरुष एवेदगं सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः ।
यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायागंश्च पूरुषः ।१। पादोऽस्य
विश्वाभूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः।
ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि
पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ।२। यत्पुरुषेण हविषा । देवा
यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः। सप्तास्यासन्परिधयः ।
त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं
बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।३। तेन देवा अयजन्त । साध्या ऋषयश्च ये ।
तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम् । पशूगंस्तागंश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च
ये । तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे । छंदागंसि जज्ञिरे तस्मात् ।

यजुस्तस्मादजायत ।४। तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।५। ऊरू तदस्य यद्वैश्यः । पद्भ्यागं शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिशश्श्रोत्रात् । तथा लोकागं अकल्पयन् ।६। वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णम् तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्, यदास्ते । धाता पुरस्ताद्य-मुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः ।७।

अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णम् तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ।८। तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति ।

यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं
जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे
।९। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ
व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वम् मनिषाण ।१०।

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः। ऊर्ध्वम् जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ।

ॐ शान्तिः शान्तिः शान्तिः ॥